# परिशिष्टम् १

# अन्वयः

0902CH12

सामान्यतः श्लोकेषु कर्तृपदं कर्मपदं तृतीयादिविभक्त्यन्तं पदं क्रियापदं विशेषणादिकं च छन्दसः अनुगुणं पूर्वापरं भवितुमर्हति। तेन पठितारः पदानां मध्ये परस्परं सम्बन्धं (अन्वयं) कल्पयितुं कदाचित् कष्टम् अनुभवन्ति। अतः श्लोकेषु विद्यमानानां पदानां परस्परं सम्बन्धं सरलरूपेण ज्ञातुं कश्चन क्रमः ज्ञातव्यः। तदनन्तरमेव श्लोकस्य अर्थमवगन्तुं शक्यते।

**श्लोकान्वयविधिः**

१. दण्डान्वयविधिः

२. खण्डान्वयविधिः

एतयोः विध्योः ज्ञानेन छात्राः श्लोके विद्यमानानां पदानां सम्बन्धं ज्ञात्वा श्लोकस्य अर्थं भावं च अवगन्तुं शक्नुवन्ति।

दण्डान्वयः (दण्डवत् अन्वयः दण्डान्वयः)—

**आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम्।**
**क्त्वा-णमुल्-ल्यप्-प्रभृत्येवं पूर्वं दण्डान्वये भवेत्॥**

कर्तृपदं कर्मपदं क्रियापदं चेति प्राथमिकी वाक्यरचनाशैली वर्तते। अस्मिन् अन्वयक्रमे विशेषणानि क्रमशः तत्तत्पदस्य पूर्वं प्रयुक्तानि भवन्ति। कर्तृपदस्य विशेषणं कर्तृपदात् पूर्वं, कर्मपदस्य विशेषणं कर्मपदात् पूर्वम् इति क्रमशः विधानं भवति। यदि श्लोकेषु अव्ययानि कृदन्तपदानि वा सन्ति तर्हि तानि केन पदेन सह सम्बद्धानि इति ज्ञात्वा तत्र प्रयोक्तव्यानि। तृतीयादीनि विभक्त्यन्तानि पदानि अपि केन पदेन सह सम्बद्धानि इति ज्ञात्वा तानि पदानि पूर्वं वा परं वा योजनीयानि। ततः परं सर्वान्ते क्रियापदं लिखेत्। कदाचित् कर्तृपदं क्रियापदं वा श्लोकेषु न दृश्यते तदा अस्माभिः विचिन्त्य तत् पदं योजनीयम्। आहत्य पदानां परस्परम् अन्वयः एव दण्डान्वयस्य क्रमः भवति। तदेव श्लोकरूपेण उक्तम्—

© NCERT not to be republished

**यथा** — शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषस्स विद्वान्।
सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम्॥

**पदच्छेदः**

शास्त्राणि, अधीत्य, अपि, भवन्ति, मूर्खाः, यः, तु, क्रियावान्, पुरुषः, सः, विद्वान्, सुचिन्तितं, च, औषधम्, आतुराणां, न, नाममात्रेण, करोति, अरोगम्॥

**दण्डान्वयः** — (केचन) शास्त्राणि अधीत्यापि मूर्खाः भवन्ति। यः क्रियावान् सः पुरुषः तु विद्वान् (भवति)। (यथा) सुचिन्तितम् औषधं नाममात्रेण आतुराणाम् अरोगं न करोति।

**विवरणम्** — अस्मिन् श्लोके 'केचन' इति शब्दः न प्रयुक्तः, 'शास्त्राणि अधीत्यापि मूर्खाः भवन्ति' इति वर्तते। तर्हि अत्र काचित् जिज्ञासा भवति यत् "शास्त्राणि अधीत्यापि के मूर्खाः भवन्ति" इति। तस्य उत्तरं यदि श्लोके विद्यते तर्हि तत् पदं पूर्वं स्थापनीयम्। परम् अस्मिन् श्लोके तु तत् पदं न प्रयुक्तम्। अतः अस्माभिः सुप्तं पदम् योजनीयम् (अध्याहार्यम्)। अत्र सुप्तं पदं 'केचन' इति भवितुमर्हति। तथैव "यस्तु क्रियावान् पुरुषस्स विद्वान्" इत्यत्र क्रियापदं किमपि न प्रयुक्तम्। किन्तु वाक्यस्य पूर्तये क्रियापदम् आवश्यकम्। अतः अत्रापि सुप्तं क्रियापदं किञ्चन योजनीयम् (अध्याहार्यम्)। तच्च 'भवति' इति क्रियापदं योजितम्। अनेन प्रकारेण 'यथा' इति शब्दस्यापि अध्याहारः कृतः। तेन श्लोकस्य पूर्णः अर्थः स्पष्टः भवति।



अत्र शिक्षकः प्रश्नोत्तरमाध्यमेनापि अन्वयं कर्तुं शक्नोति। प्रथमं पदच्छेदं कृत्वा तदनन्तरम् अध्यापकः प्रश्नं कुर्वन् श्लोके विद्यमानेभ्यः पदेभ्यः संख्यां प्रददाति। ततः परं छात्राः क्रमशः पदानि योजयित्वा अन्वयं कर्तुमर्हन्ति।

© NCERT not to be republished

यथा —

| | | | |
|---|---|---|---|
| १. शास्त्राणि | २. अधीत्य | ३. अपि | ४. मूर्खाः |
| ५. भवन्ति | ६. यः | ७. क्रियावान् | ८. सः |
| ९. पुरुषः | १०. तु | ११. विद्वान् | १२. सुचिन्तितं |
| १३. औषधम् | १४. नाममात्रेण | १५. च | १६. आतुराणां |
| १७. अरोगम् | १८. न | १९. करोति | |

**क्रमशः योजनम्** — (केचन) शास्त्राणि अधीत्य अपि मूर्खाः भवन्ति। यः क्रियावान् सः पुरुषः तु विद्वान् (भवति)। सुचिन्तितम् औषधं नाममात्रेण च आतुराणाम् अरोगं न करोति।

**खण्डान्वयः**

**कर्तृ-कर्म-क्रियास्तावच्छ्लोके योज्यास्ततः परम्।**
**किमो रूपं पुरस्कृत्य तृतीयादीनि योजयेत्॥**
**ल्यबन्तञ्च तुमुन्तञ्च क्त्वान्तं कर्मविभूषितम्।**
**अन्वयस्थपदानाञ्च यथा लिङ्गविशेषणे॥**

खण्डशः अन्वयः खण्डान्वयः इति। तन्नाम आरम्भे एव श्लोकस्य पूर्णभागस्य अन्वयः न क्रियते अपि तु प्रतिपदं परस्परम् अन्वयः क्रियते। तदपि प्रश्नोत्तरमाध्यमेन। अन्ते समग्रस्य श्लोकस्य अन्वयः स्वयमेव भविष्यति। श्लोकस्य अन्वयार्थम् अवबोधनार्थं च विशेषरूपेण चत्वारि सहकारि-कारणानि उक्तानि सन्ति। तानि — **आकाङ्क्षा, योग्यता, आसत्तिः, तात्पर्यं** च इति।

१. **आकाङ्क्षा** — अपेक्षित-विषयस्य ज्ञाने इच्छा आकाङ्क्षा। पूर्वपदस्य अग्रिमपदस्य वा ज्ञाने इच्छा इत्यपि वक्तुं शक्नुमः।

- **पूर्वपदस्य ज्ञाने इच्छा**

  **यथा** — पठति, लिखति, खादति, ददाति, पश्यति, नयति, भवन्ति, कुर्वन्ति, कुरु, स्मर, त्यज, गतम्, प्राप्तम्, लब्धम्, कृतम्, ज्ञातव्यम्, त्यक्तव्यम् इति एतादृशानि क्रियापदानि श्लोकेषु भवितुमर्हन्ति। तर्हि अत्र क्रियापदस्य श्रवणानन्तरं काचित् जिज्ञासा (ज्ञातुम् इच्छा) भवति। यथा — 'पठति' इति क्रियापदश्रवणानन्तरं 'कः पठति ?' 'किं पठति ?'

© NCERT not to be republished

'कुत्र पठति ?' 'कदा पठति ?' 'कथं पठति ?' 'किमर्थं पठति ?' 'किं निमित्तं पठति ?' 'किं कृत्वा पठति ?' च इत्यादयः विभिन्नाः प्रश्नाः भवितुमर्हन्ति।

- **अग्रिमपदस्य ज्ञाने इच्छा**

  **यथा**—श्लोके 'प्रथमान्तं पदं किम् ?' 'द्वितीयान्तं पदं किम् ?' 'तृतीयान्तं पदं किम् ?' इत्यादिकम् अत्र उदाहरणं भवितुमर्हति।

२. **योग्यता**—पदानां मध्ये परस्पर-सम्बन्धस्य पात्रता एव योग्यता । गगने पुष्पं विकसति । अस्मिन् वाक्ये योग्यतायाः अभावः वर्तते । गगने पुष्पस्य असम्भवात्।

३. **आसत्तिः**—पदानां परस्परं सामीप्यम् आसत्तिः (सन्निधिः) । एकस्य पदस्य कथनानन्तरम् अग्रिमपदम् अपि अनुक्षणं वदेत्। यदि न वदति तर्हि आसत्तिः न भवति।

**यथा**—'सः पुस्तकं पठति ।' अत्र एकवारमेव पूर्णं वाक्यं वदति अथवा पठति तर्हि पदानां मध्ये सामीप्यं भवति। तदेव आसत्तिः इत्युच्यते। यदि 'सः' इत्युक्त्वा अग्रिमं पदं पञ्चनिमेषाणामनन्तरम् अथवा कालान्तरे वदति तर्हि पदानां मध्ये सामीप्यस्य अभावः भवति। तेन पदानां मध्ये परस्परम् अन्वयः अपि न भवति।



४. **तात्पर्यम्**—शब्दविशेषात् अर्थविशेषस्य ज्ञाने इच्छा एव तात्पर्यं भवति । शब्दस्य अर्थः सम्यक् ज्ञातव्यः, अन्यथा शब्दस्य अर्थः अनर्थः भवितुमर्हति। तेन अन्वयोऽपि सम्यक् भवितुं नार्हति।

**यथा**—'शतायुर्भव' इत्युक्ते शतं वर्षाणि जीवतु इति अर्थः न अपितु 'चिरञ्जीवी भव' इति । खण्डान्वयविधौ आकाङ्क्षानुगुणं प्रश्नाः भवन्ति।

© NCERT not to be republished

अतः एषः विधिः आकाङ्क्षाविधिः इत्यपि उच्यते। अत्र प्रश्नेषु प्रथमतः क्रियापदेन आकाङ्क्षाप्रश्नः क्रियते।

**यथा** — सा विद्यालयं गच्छति इति वाक्ये क्रियापदं किम् इति प्रश्नः भवति। तस्य उत्तरं 'गच्छति' इति। तदनन्तरं क्रियाम् अनुसृत्य कर्तुः कर्मणः तृतीयादिविभक्त्यन्तानां क्त्वान्तल्यबन्तानाम् अव्यायादीनां च विषये आकाङ्क्षां कृत्वा प्रश्नाः क्रियन्ते। छात्राः विचिन्त्य उत्तराणि वदिष्यन्ति। खण्डान्वयविधौ प्रश्नाः सामान्यतया द्विपदात्मकाः त्रिपदात्मकाः चतुष्पदात्मकाः वा भवितुमर्हन्ति। तन्नाम लघुप्रश्नाः भवन्ति।

**श्लोकः**

**सम्पूर्णकुम्भो न करोति शब्दमर्धो घटो घोषमुपैति नूनम्।**
**विद्वान् कुलीनो न करोति गर्वमल्पो जनो जल्पति साट्टहासम्॥**

**पदच्छेदः** — सम्पूर्णकुम्भः, न, करोति, शब्दम्, अर्धः, घटः, घोषम्, उपैति, नूनम्, विद्वान्, कुलीनः, न, करोति, गर्वम्, अल्पः, जनः, जल्पति, साट्टहासम्।

**खण्डान्वयः**

| क्र.सं. | शिक्षकः प्रश्नान् करोति। | छात्राः उत्तराणि वदन्ति। |
|---|---|---|
| | प्रथमचरणे क्रियापदं किम्? | करोति। |
| | कः न करोति? | सम्पूर्णकुम्भः न करोति। |
| | सम्पूर्णकुम्भः किं न करोति? | सम्पूर्णकुम्भः शब्दं न करोति। |
| | द्वितीयचरणे क्रियापदं किम्? | उपैति। |
| | कः उपैति? | घटः उपैति। |
| | कीदृशः घटः उपैति? | अर्धः घटः उपैति। |
| | अर्धः घटः किम् उपैति? | अर्धः घटः घोषम् उपैति। |
| | अर्धः घटः घोषं कथम् उपैति। | अर्धः घटः घोषं नूनम् उपैति। |
| | तृतीयचरणे क्रियापदं किम्? | करोति। |
| | कः न करोति? | विद्वान् न करोति। |
| | कीदृशः विद्वान् न करोति? | कुलीनः विद्वान् न करोति। |
| | कुलीनः विद्वान् किं न करोति? | कुलीनः विद्वान् गर्वं न करोति। |



© NCERT not to be republished

| | | |
|---|---|---|
| | चतुर्थचरणे क्रियापदं किम् ? | जल्पति । |
| | कः जल्पति ? | जनः जल्पति । |
| | कीदृशः जनः जल्पति ? | अल्पः जनः जल्पति । |
| | अल्पः जनः कथं जल्पति ? | अल्पः जनः साट्टहासं जल्पति ? |

**अन्वयः**—सम्पूर्णकुम्भः शब्दं न करोति । अर्धः घटः घोषं नूनम् उपैति । कुलीनः विद्वान् गर्वं न करोति । अल्पः जनः साट्टहासं जल्पति ।

© NCERT not to be republished